# श्रीसदाशिवेन्द्रस्तवः

Shri Sadashivendrastavah

sanskritdocuments.org

November 10, 2018

# Shri Sadashivendrastavah

# श्रीसदाशिवेन्द्रस्तवः

## Sanskrit Document Information

Text title : sadAshivendrastavaH

File name : sadAshivendrastavaH.itx

Category : deities_misc, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, gurudeva

Location : doc_deities_misc

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

November 10, 2018

*sanskritdocuments.org*

# श्रीसदाशिवेन्द्रस्तवः

परतत्त्वलीनमनसे प्रणमद्भवबन्धमोचनायाशु ।
प्रकटितपरतत्त्वाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १॥

परमशिवेन्द्रकराम्बुजसम्भूताय प्रणम्रवरदाय ।
पदधूतपङ्कजाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २॥

विजननदीकुञ्जगृहे मञ्जुलपुलिनैकमञ्जुतरतल्पे ।
शयनं कुर्वाणाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ३॥

कामाहिद्विजपतये शमदममुखदिव्यरत्नवारिधये ।
शमनाय मोहवितते: प्रणतिं कुर्म सदाशिवेन्द्राय ॥ ४॥

नमदात्मबोधदायारमते परमात्मतत्त्वसौधाग्रे ।
समबुद्धयेऽश्महेम्नोः प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ५॥

गिलिताविद्याहालाहलहतपुर्यष्टकाय बोधेन ।
मोहान्धकाररवये प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ६॥

शममुखषट्कदमुमुक्षाविवेकवैराग्यदाननिरताय
तरसा नतजनततये प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ७॥

सिद्धान्तकल्पवल्लीमुखकृतिकर्त्रे कपालिभक्तिकृते ।
करतलमुक्तिफलाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ८॥

तृणपङ्कलिप्तवपुषे तृणतोऽप्यधरं जगद्विलोकयते ।
वनमध्यविहरणाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ९॥

निगृहीतहृदयहरये प्रगृहीतात्मस्वरूपरत्नाय ।
प्रणताब्धिपूर्णशशिने प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १०॥

अज्ञानतिमिररवये प्रज्ञानाम्भोधिपूर्णचन्द्राय ।
प्रणताघविपिनशुचये प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ११॥

मतिमलमोचनदक्षप्रत्यग्ब्रह्मैक्यदाननिरताय ।
स्मृतिमात्रतुष्टमनसे प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १२॥

निजगुरुपरमशिवेन्द्रश्लाघितविज्ञानकाष्ठाय ।
निजतत्त्वनिश्चलहृदे प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १३॥

प्रविलाप्य जगदशेषं परिशिष्टाखण्डवस्तुनिरताय ।
आस्यप्राप्तान्नभुजे प्रणतिं कुर्मः सदाशिवेद्राय ॥ १४॥

उपधानीकृतबाहुः परिरब्धविरक्तिरामो यः ।
वसनीकृतखायास्मै प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १५॥

सकलागमान्तसारप्रकटनदक्षाय नम्रपक्षाय ।
सच्चित्सुखरूपाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १६॥

द्राक्षाशिक्षणचतुरव्याहाराय प्रभूतकरुणाय ।
वीक्षापावितजगते प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १७॥

योऽनुत्पन्नविकारो बाहौ म्लेच्छेन च्छिन्नपतितेऽपि ।
अविदितममतायास्मै प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १८॥

न्यपतन्सुमानि मूर्धनि येनोच्चरितेषु नामसूग्रस्य ।
तस्मै सिद्धवराय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ १९॥

यः पापिनोऽपि लोकांस्तरसा प्रकरोति पुण्यनिष्ठाग्र्यान् ।
करुणाम्बुराशयेऽस्मै प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २०॥

सिद्धेश्वराय बुद्धेः शुद्धिप्रदपादपद्मनमनाय ।
बद्धौघमोचकाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २१॥

हृद्याय लोकविततेः पद्यावलिदाय जन्ममूकेभ्यः ।
प्रणतेभ्यः पदयुगले प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २२॥

जिह्वोपस्थरतानप्याह्वोच्चारेण जातु नैजस्य ।
कुर्वाणाय विरक्तान्प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २३॥

कमनीयकवनकर्त्रे शमनीयभयापहारचतुराय ।
तपनीयसदृशवपुषे प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २४॥

तारकविद्यादात्रे तारापतिगर्ववारकास्याय ।
तारजपप्रवणाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २५॥

मूकोऽपि यत्कृपा चेल्लोकोत्तरकीर्तिराशु जायेत ।
अद्भुतचरितायास्मै प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २६॥

दुर्जनदूरायतरां सज्जनसुलभाय पात्रहस्ताय ।
तरुतलनिकेतनाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २७॥

भवसिन्धुतारयित्रे भवभक्ताय प्रणम्रवश्याय ।
भवबन्धविरहिताय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २८॥

त्रिविधस्यापि त्यागं वपुषः कर्तुं स्थलत्रये य इव ।
अकरोत्समाधिमस्मै प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ २९॥

कामिनमपि जितहृदयं क्रूरं शान्तं जडं सुधियम् ।
कुरुते यत्करुणास्मै प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ३०॥

वेदस्मृतिस्थविद्वल्लक्षणलक्ष्येषु सन्दिहानानाम् ।
निश्चयकृते विहर्त्रे प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ३१॥

बालारुणनिभवपुषे लीलानिर्धूतकामगर्वाय ।
लोलाय चिति परस्यां प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ३२॥

शरणीकृताय सुगुणैश्चरणीकृतरक्तपङ्कजाताय ।
धरणीसदृक्क्षमाय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ३३॥

प्रणताय यतिवरेण्यैर्गणनाथेनाप्यहार्यविघ्नहृते ।
गुणदासीकृतजगते प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ३४॥

सहमानाय सहस्राण्यप्यपराधान्प्रणम्रजनरचितान् ।
सहसैव मोक्षदात्रे प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ३५॥

धृतदेहाय नतावलितूर्णप्रज्ञाप्रदानवाञ्छातः ।
श्रीदक्षिणवक्त्राय प्रणतिं कुर्मः सदाशिवेन्द्राय ॥ ३६॥

तापत्रयार्तहृदयस्तापत्रयहारदक्षनमनमहम् ।
गुरुवरबोधितमहिमा शरणं यास्ये तवाङ्घ्रिकमलयुगम् ॥ ३७॥

सदात्मनि विलीनहृत्सकलवेदशास्त्रार्थवि-
त्सरित्तटविहारकृत्सकललोकहृत्तापहृत् ।
सदाशिवपदाम्बुजप्रणतलोकलभ्य प्रभो

सदाशिवयतीट् सदा मयि कृपामपारां कुरु ॥ ३८॥

पुरा यवनकर्तनस्रवदमन्दरक्तोऽपि यः
पुनःपदसरोरुहप्रणतमेनमेनोनिधिम् ।
कृपापरवशः पदं पतनवर्जितं प्रापय-
त्सदाशिवयतीट् स मय्यनवधिं कृपां सिञ्चतु ॥ ३९॥

हृषीकहृतचेतसि प्रहृतदेहके रोगकै-
रनेकवृजिनालये शमदमादिगन्धोज्झिते ।
तवाङ्घ्रिपतिते यतौ यतिपते महायोगिराट्
सदाशिव कृपां मयि प्रकुरु हेतुशून्यां द्रुतम् ॥ ४०॥

न चाहमतिचातुरीरचितशब्दसङ्घैः स्तुतिं
विधातुमपि च क्षमो न च जपादिकेऽप्यस्ति मे ।
बलं बलवतां वर प्रकुरु हेतुशून्यां विभो
सदाशिव कृपां मयि प्रवर योगिनां सत्वरम् ॥ ४१॥

शब्दार्थविज्ञानयुता हि लोके वसन्ति लोका बहवः प्रकामम् ।
निष्ठायुता न श्रुतदृष्टपूर्वा विना भवन्तं यतिराज नूनम् ॥ ४२॥

स्तोकार्चनप्रीतहृदम्बुजाय पाकाब्जचूडापररूपधर्त्रे ।
शोकापहर्त्रे तरसा नतानां पाकाय पुण्यस्य नमो यतीशे ॥ ४३॥

नाहं हृषीकाणि विजेतुमीशो नाहं सपर्याभजनादि कर्तुम् ।
निसर्गया त्वं दययैव पाहि सदाशिवेमं करुणापयोधे ॥ ४४॥

कृतयानया नतावलिकोटिगतेनातिमन्दबोधेन ।
मुदमेहि नित्यतृप्तप्रवर स्तुत्या सदाशिवाश्वाशु ॥ ४५॥

इति शृङ्गेरि श्रीजगद्गुरु श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचितः श्रीसदाशिवेन्द्रस्तवः सम्पूर्णः ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

*Shri Sadashivendrastavah*

pdf was typeset on November 10, 2018

Please send corrections to *sanskrit@cheerful.com*